# बोर्ड कृतिपत्रिका : मार्च 2017

**समयः 2 होरात्रयम्।** **गुणाः 40**

**सूचनाः**

i. सर्वासु कृतिषु वाक्यानां पुनर्लेखनम् आवश्यकम्।

ii. यथासूचनं आकलनकृतयः व्याकरणकृतयः आरेखितव्याः।

iii. आकृतीनाम् आलेखनं मसिलेखन्या कर्तव्यम्।

**प्रथमः विभागः गद्यम्।**

**कृति 1.अ. गद्यांशं पठित्वा निर्दिष्टेः कृती कुरुत।**

**अ.1. अवबोधनम्। (केऽपि 2 कृती कुरुत)** **[1]**

i. उचितं कारणं चित्वा वाक्यं पुनर्लिखत।

पिपीलिकाः अर्जुनं प्रार्थयन्ते यतः _______

1. शाखासु तासां पर्णबद्धाः निलयाः सन्ति।
2. शाखायाम् तासां निबद्धं नीडम् अस्ति।

ii. कः कं वदति?

“किं बहुना, शाखाच्छेदतेन वयं सर्वे निराश्रयाः भवेम।” **[1]**

iii. वाक्यं पुनर्लिखित्वा सत्यं वा असत्यमिति लिखत।

“तस्य वचनं श्रुत्वा करुणार्द्रहृदया पिपीलिका तमुवाच।” **[1]**

एकदा श्रेष्ठो धनुर्धारी अर्जुनः विहारार्थं निबिडारण्यं जगाम। जनसमाकुलान्नगराद् दूरं गत्वा सः मनःशान्तिमनुभवितुमैच्छत्।वने विहरन् चण्डातपेन तप्तः सः वीजनार्थं वृक्षशाखां छेत्तुं प्रारेभे। तदैव कोऽपि सूर्यखगः तत्रागत्य तस्य हस्ते उपविश्य तं प्रार्थयामास - “हे धनुर्धर, न छेत्तव्या शाखासौ यतः शाखायामस्यां निबद्धे नीडे मम शावकाः सुप्ताः। महता कष्टेन निर्मितमेतन्नीडं मया। मामनुग्रहीतुमर्हति भवान्।” तस्य वचनं श्रुत्वा करुणार्द्रहृदयः अर्जुनः तमुवाच, “मा कातरो भव। न पीडयामि त्वां तव शावकान् वा।” ततः अपरस्य वृक्षस्य शाखां छेत्तुं प्रवृत्तस्य अर्जुनस्य हस्तस्योपरि काश्चन पिपीलिकाः वृक्षादपतन्। ता अपि अर्जुनं प्रार्थयन्त, “हे स्वामिन् एतासु शाखासु पर्णबद्धाः कन्दुकाकाराः अस्माकं निलयाः। तदाश्रिताः अस्माकं शावकाः अस्माकं राज्ञी सेवकाश्च। किं बहुना, शाखाच्छेदनेन वयं सर्वे निराश्रयाः भवेम। अस्मान् उपकरोतु भवान्। आपत्काले त्वां ध्रुवं साहाय्यं करिष्यामः।

पिपीलिकानामभ्यर्थनामाकर्ण्य अर्जुनस्तस्मात् स्थानात् प्रातिष्ठताचिन्तयच्च, “क्षुद्राः जन्तवः एते सूर्यखगाः पिपीलिकाः। कथं मम साहाय्यकारिणः भविष्यन्ति। अहं तु शक्तिमान्, शस्त्रधारी, निपुणयोद्धा च।”

**अ.2. स्वमत प्रकटनम्।** **[2]**

अपि प्रार्थना समस्यानिराकरणे साहाय्यकारी भवति? एतस्मिन् विषये माध्यमभाषया 30/40 शब्दपरिमितां भवत्प्रतिक्रियां लिखत।

**ब. गद्यांशं पठित्वा निर्दिष्टे कृती कुरुत।**

**ब.1. अवबोधनम्। (केऽपि 2 कृती कुरुत)** **[1]**

i. उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत।

बीजिङ्गनगरे समायोजितायाम् ऑलिम्पिकस्पर्धायां _______ देशेन सुवर्णपदकं विजितम् _______ क्रीडायाम् एव।

(भारत / बांग्लादेश; खो-खो / कबड्डी)

ii. पूर्णवाक्येन उत्तरं लिखत। **[1]**


कबड्डी-क्रीडाप्रकार: ऑलिम्पिक-वैश्विक-क्रीडास्पर्धासु कदा निवेशित:?

iii. वाक्यं पुनर्लिखित्वा योग्यं वा अयोग्यमिति लिखत। **[1]**

कबड्डीक्रीडायै क्रीडासाधनस्य आवश्यकता अस्ति।

**ब.2. पथक्करणम्।** **[2]**

**गद्यांशत: उचितान् शब्दान् चित्वा जालरेखाचित्रं पूरयत।**




अनया कबड्डी – क्रीडया शरीरचापल्यम् उत्साह: आक्रमकत्वं स्वसंरक्षणवृत्ति: शरीरसौष्ठवं च लभते। साहसं निरीक्षणशक्ति: योजकत्वं निर्णयक्षमता साङ्घिकी भावना एकात्मता देशाभिमानश्चैतै: नैकैर्गुणै: क्रीडकस्य व्यक्तित्वं विकसति। एतस्यै क्रीडायै कस्यापि क्रीडासाधनस्यावश्यकता नास्तिति महत्त्वपूर्णं वैशिष्ट्यम्।

स्वातन्त्रपूर्वकालादेव क्रीडामेतां वैश्विकस्तरं नेतुं प्रथमप्रयास: कृत: महाराष्ट्रेणैव। शून्यपञ्चनवैकतमे (1950) ख्रिस्ताब्दे अखिल-भारतीय-कबड्डी-सङ्घटनाया: स्थापना समजायत। भारतीय ऑलिम्पिक - क्रीडासमित्यां अष्टपञ्चनवैक (1958) तमे ख्रिस्तवर्षे एष: क्रीडाप्रकार: ऑलिम्पिक - वैश्विक - क्रीडास्पर्धासु निवेशित:। शून्यनवनवैक (1990) तमे संवत्सरे बीजिङ्गनगरे आयोजितायाम् ऑलिम्पिकस्पर्धायां चीनदेशेनापि एषा क्रीडा स्वीकृता। तदनन्तरं कबड्डीक्रीडाया: सुवर्णयुगमेवावतरितम्। बीजिङ्गनगरे समायोजितायाम् ऑलिम्पिकस्पर्धायां भारतदेशेन सुवर्णपदकं विजितम् कबड्डीक्रीडायामेव। अनेन सुवर्णपदकेन आशियाई-स्पर्धाया: कबड्डीक्रीडायां सातत्येन त्रिवारं सुवर्णपदकं प्राप्य विश्वविक्रम: प्रस्थापितो भारतदेशेन।

**क. गद्यांशं पठित्वा निर्दिष्टे कृती कुरुत।**

**क.1. पृथक्करणम्। (यथाक्रमं घटना: लिखत।)** **[2]**

i. अधिकमूल्यं दत्त्वा प्रवेशपत्राणां क्रयणम्।

ii. राष्ट्रीयपुरस्कारप्राप्तं चित्रपटार्थं गन्तव्यम्।

iii. स्वकार्यस्य सत्वरसिद्ध्यर्थं कार्यालयेषु अधिकमूल्यं दातव्यम्।

iv. अवैधाचारशब्दस्य समग्रार्थं न ज्ञातव्यम्।

**क.2. शब्दज्ञानम्। (केऽपि 2 कृती कुरुत।)**

i. 1. गद्यांशत: सखा शब्दस्य कृते पर्यायशब्दं लिखत। **[½]**

गद्यांशत: वैधाचार: शब्दस्य कृते विलोमशब्दं लिखत। **[½]**

ii. विशेषण-विशेष्य अन्विति:-मेलनं कुरुत। **[1]**

| | ‘अ’ | ‘ब’ |
|---|---|---|
| 1. | राष्ट्रीय पुरस्कारप्राप्त: | मूल्यम। |
| 2. | अधिकं | समग्रार्थ: न ज्ञात:। |
| | | चित्रपट:। |

iii. गद्यांशत: तृतीयाविभक्ते: रूपद्वयं लिखत। **[1]**


| | |
|---|---|
| कुमारः – | तात, अप्यद्य वयं सर्वे राष्ट्रीयपुरस्कारप्राप्तं चित्रपटं प्रेक्षितुं गच्छामः? |
| जनकः – | जात, किन्तु चित्रपटस्यास्य प्रवेशपत्राणि सद्यः नोपलभ्यन्ते इति श्रुतं मया। अद्य तु रविवासरः। तर्हि किमु वक्तव्यम्? |
| कुमारः – | जानामि तत्सर्वं, किन्तु अधिकमूल्यं दत्त्वा प्रवेशपत्राणि लभ्यन्ते। |
| जनकः – | सौम्य, कथं त्वया ज्ञायते? |
| कुमारः – | वयस्येन कथितम्।तेनापि तथा क्रीतानि। वयमपि तथैव करिष्यामः। |
| जनकः – | पुत्र, अपि जानासि त्वं यद् असावनुचितः मार्गः? एष अवैधाचारः। |
| कुमारः – | श्रुतः मया शब्दोऽयम्। |
| जनकः – | श्रृणु तर्हि। केवलं स्वार्थसिद्धये अनुष्ठितं विधिविरुद्धमाचरणं, नियमातिक्रमणं, निषिद्धाचरणं नाम अवैधाचारः। |
| कुमारः – | स्वकार्यस्य सत्वरसिद्ध्यर्थं केचन जनाः तेषु तेषु कार्यालयेष्वधिकमूल्यं ददति इति श्रुतं मया। किमेष अवैधाचारः? |

**द्वितीयः: विभागः पद्यम्।**

**कृति 2.अ. पद्यांशं पठित्वा निर्दिष्टे कृती कुरुत।**

**अ 1. पृथक्करणम्।**

पद्यांशतः उचितान् शब्दान् चित्वा जालरेखाचित्रं पूरयत। **[2]**




**अ.2. शब्दज्ञानम्।**

(1) चतुर्थपदं लिखत – [½ ]

विद्वान : प्राज्ञः : : धनम् : ______।

(2) समूहेतरं पदं लिखत – [½ ]

मृदुः, कोमलः, विमलः।

अतिथिर्बालकः पत्नी जननी जनकस्तथा।
पञ्चैते गृहिणा पोष्या इतरे च स्वशक्तितः ।।1।।
शनैः शनैश्च भोक्तव्यं स्वयं वित्तमुपार्जितम्।
रसायनमिव प्राज्ञैर्हेलया न कदाचन ।।2।।
एकैकं घर्षयेद्दन्तं मृदुना कूर्चकेन च।
दन्तशोधनचूर्णेन दन्तमांसान्यबाधयन् ।।3।।

**ब. पद्यांशं पठित्वा निर्दिष्टे कृती कुरुत।**

**ब.1. तात्पर्यलेखनम्।**

i. प्रथमस्य द्वितीयस्य सुभाषितस्य तात्पर्यं माध्यमभाषया लिखत। **[2]**

**पद्यांशः**

कालज्ञः समयज्ञश्च सदा वश्यश्च नोद्धतः।
अनुलोमस्तथास्तब्धस्तेन नाभ्येति वेतसः ।।1।।

एवमेव यदा विद्वान् मन्यतेऽतिबलं रिपुम्।
संश्रयेद् वैतसीं वृत्तिमेतत् प्रज्ञानलक्षणम् ।।2।।

धर्मार्थकाममोक्षाणामारोग्यं मूलमुत्तमम्।
रोगास्तस्यापहर्तार: श्रेयसो जीवितस्य च ।।3।।

**ब.2. अवबोधनम्। पूर्णवाक्येन उत्तरं लिखत।** **[1]**
रोगा: कस्य अपहर्तार:?

**क. क.1. स्मरणम्। श्लोकांशान् मेलयत।** **[2]**

| 'अ' | 'ब' |
|---|---|
| याममध्ये न भोक्तव्यं | कर्मणा मनसा गिरा। |
| अद्रोह: सर्वभूतेषु | हेलया न कदाचन। |
| पात्रापात्रविवेको हि | यामयुग्मं न लङ्घयेत्। |
| रसायनमिव प्राज्ञै: | धेनुपन्नगयोरिव। |
| | यामयुग्माद्बलक्षय:। |

**क.2. श्लोकपूर्ति:।** **[2]**
सुभाषितं शुद्धं पूर्णं च लिखत। (केवलं 1)

(1) यत्रोत्साह _______ ।
_______ ध्रुवम्।।

(2) भोजनान्ते _______ ।
_______ जायते।।

**तृतीय: विभाग: – व्याकरणम्।**

**कृति 3. यथानिर्देशं कृती: कुरुत।** (5 उपप्रश्ना: लेखनीया:।)

**अ. नाम / सर्वनामपदानां पृथक्करणम्।**
मञ्जूषात: पदानि चित्वा कोष्ठकपूरणं कुरुत।
(6 पर्यायेषु 4 पर्याया: लेखनीया:।) **[2]**

| विभक्ति | द्वितीया एकवचन Accusative singular | षष्ठी बहुवचन Genitive Plural | सप्तमी द्विवचन Locative Dual |
|---|---|---|---|
| नाम | | | |
| सर्वनाम | | | |

(औषधम्, मनसो:, सर्वम्, ग्राहकाणाम्, आवयो:, तेषाम्।)

**ब. क्रियापदानां पृथक्करणम्।**
मञ्जूषात: पदानि चित्वा कोष्ठकपूरणं कुरुत।
(6 पर्यायेषु 4 पर्याया: लेखनीया:।) **[2]**

| द्वितीयभविष्यत्काल: II Future Tense | परोक्षभूतकाल: Perfect past | प्रथमभूतकाल: Imperfect past | विध्यर्थ: Potential | आज्ञार्थ: Imperative | वर्तमानकाल: Present Tense |
|---|---|---|---|---|---|
| | | | | | |

(ददातु, क्रीडिष्यति, उवाच, शृणुयात्, अब्रवीत्, लभते)

**क. समासाः।** (6 पर्यायेषु 4 पर्यायाः लेखनीयाः।) **[2]**

मेलनं कुरुत। (समस्तपदानां समासनामभिः सह मेलनम्।)

| | | |
|---|---|---|
| i. | परमगहनः | उपपद तत्पुरुषः |
| ii. | ग्राहकार्थम् | इतरेतर द्वन्द्वः |
| iii. | अहर्निशम् | कर्मधारयः |
| iv. | साशङ्कम् | समाहार द्वन्द्वः |
| v. | कुम्भकारः | क्रियाविशेषण सह बहुव्रीहिः |
| vi. | सङ्कटमुक्तः | चतुर्थी तत्पुरुषः |
| | | पञ्चमी तत्पुरुषः |

**ड. उपपद विभक्तिः।** (6 पर्यायेषु 4 पर्यायाः लेखनीयाः।) **[2]**

उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत।

i. इदं गृहीत्वा _______ गच्छतम्। (स्वगृहस्य / स्वगृहम्)

ii. वृक्षः _______ छायां यच्छति। (जनेभ्यः / जनानाम्)

iii. _______ विना जीवनम् अशक्यम्। (जलं / जलाय)

iv. शिक्षणं _______ कृते आवश्यकम्। (सर्वेषां / सर्वाभ्याम्)

v. लता मंगेशकरमहोदया _______ निपुणा। (गायनात् / गायने)

vi. माता _______ कथां कथयति। (बालकाः / बालकाय)

**इ. सन्धिं / सन्धिविग्रहं कुरुत।**

रिक्तस्थानपूर्तिः।(6 पर्यायेषु 4 पर्यायाः लेखनीयाः।) **[2]**

| | | | |
|---|---|---|---|
| i. | उभावपि | = | उभौ + _______। |
| ii. | _______ | = | दण्डः + अपि। |
| iii. | तस्मिन्नेव | = | _______ + एव। |
| iv. | अप्यद्य | = | अपि + _______। |
| v. | _______ | = | अचिन्तयत् + च। |
| vi. | निर्मितैषा | = | _______ + एषा। |

**फ. सङ्ख्यावाचकविशेषणानि।** (6 पर्यायेषु 4 पर्यायाः लेखनीयाः।) **[2]**

रिक्तस्थानपूर्तिः।

i. तस्य सेवाभावं ज्ञात्वा नागार्जुनस्तमेव _______ युवकं सहायकत्वेन स्वीकृतवान्। (2 रा / 2nd)

ii. पाठ्यपुस्तके _______ पद्यपाठाः सन्ति। (6)

iii. _______ प्रमुखाः दिशः सन्ति। (4)

iv. सप्ताहस्य _______ अहं मन्दिरं गच्छामि। (तीनदा / Third)

v. साहित्ये _______ रसाः सन्ति। (9)

vi. इन्द्रचापे _______ वर्णाः सन्ति। (7)

## चतुर्थः विभागः – लेखनकौशलम्।

**कृति 4. अधोनिर्दिष्टे कृती कुरुत।**

**अ. वाक्यनिर्माणम्**

तालिकातः शब्दान् चित्वा अर्थसङ्गतानि 4 वाक्यानि लिखत। **[4]**

| | | |
|---|---|---|
| मधुमक्षिकाः | गीतं | कुर्वन्ति। |
| गायकः | परोपकारं | गायति। |
| कुसुमं | चित्तम् | सञ्चिन्वन्ति। |
| वृक्षाः | मधु | आकर्षयति। |

**ब. कथा / परिच्छेदपूर्तिः**

मञ्जूषातः उचितान् शब्दान् चित्वा 4 रिक्तस्थानानि पूरयित्वा कथां पुनर्लिखत। **[4]**

अहमेको छात्रोऽस्मि। मम अभिधानम् प्रहर्षोऽस्ति। अहं दिल्लीनगरस्य एकस्मिन् प्रतिष्ठिते विद्यालये दशम्यां कक्षायां पठामि। मम विद्यालयः चतुर्दिक्क्षेत्रे _______अस्ति। अहं स्वगृहात् प्रातरेव सप्तवादने विद्यालयस्य वाहनेन पठितुं गच्छामि। वाहने अन्येऽपि मम _______ मिलन्ति। यैः सह मनोरञ्जनं कुर्वन्नहं विद्यालयं गच्छामि। तत्र विद्यालयस्य परिश्रमिणः शिक्षकाः मां श्रद्धया पाठयन्ति। तेषां सङ्गतिं प्राप्य अहमतिप्रसन्नो भवामि। मम विद्यालये देशस्य प्रसिद्धाः नेतारः, क्रीडकाः, अभिनेतारः, वैज्ञानिकाः अपि _______ समागच्छन्ति, स्वजीवनविषये च छात्रान् बोधयन्ति। अनेन छात्राः समयानुसारं स्वकल्याणार्थं _______ प्राप्नुवन्ति, स्वजीवने च सफलाः भवन्ति। मम विद्यालयः वास्तविकरूपेण विद्यामन्दिरोऽस्ति।

(शब्दमञ्जूषाः - मार्गदर्शनम्, यथासमयम्, प्रसिद्धः, सहपाठिनः)